Angaraka ashttottara shatanama stotra - Devanagari

॥ श्री महागणपतये नमः ॥
Indian Astrology Source
www.astrovidya.com

## अथ अंगारक अष्टोत्तर शतनाम स्तोत्रं

ओं महीसुतो महाभागो मंगळो मंगळप्रदः। महावीरो महाशूरो महाबल पराक्रमः॥ महारौद्रो महाभद्रो महनीयो दयाकरः। मानदोमर्षणो क्रूरः तापपापवर्जितः॥ सुप्रतीपस्सुताम्राक्षः सुब्रह्मण्यो सुखप्रदः। वक्रस्तंभादि गमनो वरेण्यो वरदस्सुखी॥ वीरभद्रो विरूपाक्षः विदूरस्थो विभावसुः। नक्षत्रचक्रसंचारी क्षत्रप्रोक्षात्रवर्जितः॥ क्षयवृद्धि विनिर्मुक्तो क्षमायुक्तो विचक्षणः। अक्षीणफलदायो चक्षुर्गोचरः शुभलक्षणः॥ वीतरागो वीतभयो उज्वलो विश्वकारणः। नक्षत्रराशिसंचारो नानाभयनिकृंतनः॥ कमनीयो दयासारः कनत्कनकभूषणः। भयघ्नो भव्यफलदो भक्ताभयवरप्रदः॥ शत्रुहंताशमोपेतः शरणागतपोषकः। साहसो सद्गुणाध्यक्ष साधुसमरदुर्जयः॥ दुष्टदूर शिष्टपूज्य स्सर्वकष्टनिवारकः। दुश्चेष्ट दुःखभंजनो दुर्धरो हरिः॥ दुःस्वप्नहंता दुर्धर्षो दुष्टगर्वविमोचकः। भरद्वाज कुलोद्भूतः भूसुतो भव्यभूषणः॥ रक्तांबरो रक्तवपुर्भक्तपालनतत्परः। चतुर्भुजो गदाधारी मेषवाहोमिताशनः॥ शक्तिशूलधरश्शक्त शस्त्रविद्या विशारदः। तार्किको तामसाधारो तपस्वी ताम्रलोचनः॥ तप्तकांचनसंकाशः रक्तकिंजल्कसन्निभः। गोत्राधिदेवो गोमध्यचरो गुणविभूषणः॥ असृजांगारकोवंतीदेशाधीशो जनार्दनः। सूर्ययाम्यप्रदेशस्थो यौवनो याम्यदिङ्मुखः॥ त्रिकोणमंडलगतो त्रिदशाधिपसन्नुतः शुचिश्शुचिकरः शूरो शुचिवश्यश्शुभावहः। मेषवृश्चिकराशीशो मेधावी मितभाषणः॥ सुखप्रदोसुरूपाक्षः सर्वाभीष्टफलप्रदो श्रीमते अंगारकः॥ इति अंगारक अष्टोत्तर शतनामस्तोत्रं॥

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com